नं. ५२९८

कात्यायनी तन्त्र टीका
मन्त्र व्याख्या प्रकाशिका

कर्ता श्रीनील कण्ठ:

पत्र. १४ — ग्रं. ×

विषय: तन्त्रम्.

कात्यायनीतंत्रमंत्रव्याख्या प्रकाशिका
टीका

५२९५

5295
F.=14.
Complete

ॐ श्रीगणेशाय नमः ॐ अम्बुलोगिरीशागिरिपौत्रो मातामहस्तोचतातनतोयातो सर्वस्य यत्स्वभावाद्धृदे
पूर्णोल्लासो नगिरिजातो १ येसंतिश्रुतिमौलिसारसिकायज्ञानपर्वपरे स्वर्गीमाथरमाधुरमाधुरी
परिचयेसेरं भिणस्तेन्नते २ अस्माकंतत्तदेवलोचनचमत्कारायभूयाच्चिरं प्रालेयाचलकंदरोदरगु
रीदेलत्रमेनं वपुः ३ मेनेमत्तीरूपमितिवाक्योर्थः मेनायांभवंमैनमुमारूपमितिगूढोर्थः श्री
मल्लक्ष्मवतीलक्ष्मीमातरंदेशिकोत्तमं पितरंरङ्गनाथाख्यंदेशिकोत्तममाश्रये ४ शैवोपनाम
कोविद्वानीलकंठोभिधाननः सप्तशतीसप्तशतमंत्रसंख्याविभाजके ५ कात्यायनोतंत्रमथोप
दर्शनोविरोधिनी व्याख्यांकरोतिशिवयोस्तोषायज्ञानतामुदे ६ अथेदंसप्तशतीस्तोत्रं मार्कंडेय
उवाचेत्यारभ्यसावर्णिर्भविता मनुरित्यंतंत्रयोदशाध्यायात्मकं मार्कंडेयपुराणेनर्गतं सर्वकामदुघेन
केनचिन्निर्मितं किं तु वेदवदनाद्येव तदुक्तं भुवनेश्वरी संहितायां यथावेदोह्यनादिर्हि तद्वत्सप्तशती
स्मृतेति मेरुतंत्रेपि सप्तशत्यास्तु सकलं तत्त्वं वेद्मि हमेव हि पादेन च श्रीहरिर्वेत्तिवेत्त्यर्धंतु प्रजाप।
तिः व्यासस्तुपादपादांशंकेवेत्तिकोऽस्यशंसितरेजनाइति व्यासेनप्रकटीकृतत्वात्तुव्यासकृतमिति लोके
व्यवहारः रुद्रयामलेपि अर्गलास्तवमेदेव्यामाहात्म्यं सर्वसिद्धिदं वा कीलकंश्चपठेच्चसप्तशत्या
त्मकंस्तुवं सविशेषपरंसाद्यान्विद्धिक्तिमहिमास्त्रुपं तात्पर्यंगत्यातत्त्वकृत्वनिर्विशेषविदाश्रपमि
तिनवास्यस्तोत्रस्य सप्तशतीसप्तशतीचेतिनामद्वयंतत्त्व व्युत्पत्तिर्मेरुतंत्रे सप्तशत्याश्चरित्रेतु प्रथमे

का॰त॰ १

पद्मजो मुनिः छंदो गायत्र्यादि तं महाकाली तद्देवता वाग्बीजं पावकस्तत्त्वं धर्मार्थे विनियोजनं प्र
योजनं प्रयोगाणां तत्तत्तिर्मारणमोहनेऽत्र इत्यादि उच्चाटस्तंभने चात्र प्रयोगाणां शतद्वयं मध्यमे
तु चरित्रे स्यात् तृतीयेऽप्यचरित्रके विद्वेषवश्यपौष्ट्याद्य प्रयोगादिकृते मताः एवं सप्तशतं चात्र प्रयोगाः
संप्रकीर्तिताः तस्मात्सप्तशतीत्येवं प्रोक्ता व्यासेन धीमता मदीयाधियेत्यादि सप्त: सप्तकल्पेन यादि मे
वसिष्ठ इन्द्र हम्मुकाण्णं विस्रुहड्ड स्रड्डस्रद्दिषां उपास्या देवता जाता नामाद्यास्त्रब्रह्मणा स्तुताः तस्मा
त्सप्तसतीत्येवं व्यासेन परिकीर्तिता तथा मध्यमचरित्रे लक्ष्मीलक्षिता काली दुर्गा गायत्र्यहं पंतो
सरस्वतीरिति तथा कालीता रात्रिर्वेत्र महत्वाह महत्वी भुवनेश्वरी बाला कुब्जेति सप्तसतीनां मंत्रा
गुप्तरूपेण कथिताः तस्मात्सप्तसतीति नाम तथा तृतीयचरित्रे ब्राह्म्याद्याश्चामुंडांताः सप्त त
था नंदा शाकम्भरी भीमा रक्तदंतिका दुर्गा भ्रामर्यः सप्त सप्तसंख्याकास्तस्मात्सप्तसती
नामेत्यादि मेरुतंत्रेऽप्युक्तं तत्र होमतर्पणे माजने मंत्रैः संपुटीकरणे च सप्तशतमंत्रविभागं कृत्वैव हो
मादिकं सप्तशतमंत्रैः कर्तव्यमन्यथा विफलं भवतीति वक्ष्यमाण कात्यायनीतंत्रवचनादस्य सप्त
शतीस्तोत्रस्य सप्तशतमंत्रविभागोऽवश्यमपेक्षितः स च मंत्रविभागः कात्यायनीतंत्रे उक्तः स च
कात्यायनीतंत्रव्याख्यानेन स्पष्टीक्रियते ॥

ईश्वर उवाच मार्कंडेय उवाचाद्य इति अस्यार्थः मार्कंडेय उ पउवाचेत्याद्यः प्रथम एको मंत्र इत्यर्थः त
तस्तु उत्तरं द्वितीयस्वर आकारस्तेन संयुतः संयुक्तो व्योम हकारस्तस्यादि वर्णः सकारस्तेन साद्य
ति सिद्धं तमारभ्य त्यपमित्यन्तरद्वयमंति मंत्रे ये तेन दंतिमा अष्टादशानन्त्स्या काः श्लोकात्म
का मंत्रा भवंतीत्यर्थः तत्र यद्यपि सावर्णिः स्वपितन पइत्यारभ्य प्रत्युवाच सतं वै पूपः प्रश्रयावनतोत्य
पमित्यष्टान्सूर्वचमस्श्लोकाः प्रत्युवाच सतं वै पूप इति तथ श्लोक पवत्यापि श्लोकाध श्लोकस्यैव मंत्रत्वं।
स्त्रीकृत्य व्याख्यायेनाल्लोकाई पि श्लोक व्यवहारः कृत इति बोध्यं तथा च प्रथममंत्रे त्वासह

ईश्वर उवाच मार्कंडेय उवाचाद्यो मंत्रः श्लोकात्मकात्मकः व्यो
मादि वर्णमारभ्य द्वितीयस्वर संयुतं १ त्यपमित्यंतिमा मंत्रा भवं
त्यष्टादशाग्निये वैष्णवाक्यं ततः श्लोका व्योमाद्या स्तेव मंत्रकाः २

तापकोनविंशति मंत्रास्तपन्नाः वैष्णवाक्यमिति वैष्णव उवाचेत्येको मंत्र इत्यर्थः ततस्तु उत्तर
व्योमाद्यादिति लप्त्रोपेपंचमी व्योम हकारस्तदाद्यः सकारस्तमारभ्येत्यर्थः तमारभ्य श्लोका
मर्थाश्चतारः तेषां च मंत्रका भवंतीति शेषः चतुः श्लोकानामेव तावत्पर्यंत सत्वात् नन्वर्धेषु श्लोके
षु पंचमंत्रत्वं कथमिति चेत्प्रथम श्लोकस्याई भागस्य मंत्रत्व स्वीकारात् तदुक्तं भुवनेशी संहितायां

का॰ तं॰ न्दपस्यो क्लि रिति रामो वा चेत्येको मंत्रो भवतीति शेषः मांतवर्णेपकारां तवर्णेपकारः कथं भूतो पे
२ कारेण युक्तस्तेन यथेऽन्ति सिद्धं स्वर्याद्दितं शादो शुश्र यच सकारो बिंदुसंयुक्तो तेवसाने ईं हृशे मंत्रो द्वौ म
तौ पृ निरस्ताद् इन्ति स्तो के खेड हृयं कृ तामेत्रद्वयं संपादनीयमिति भावः १ ततो वैश्यउवाचेतीति वैश्य
उवाच इत्येको मंत्र इत्यर्थः स्वरेषु पकारः शः स्वरपकारः शः स्वरेशारि याद्दो श्रयचतुर्वह्नि बीजं रकारः क
थं भूतं बिंदुयुक्तं तेन रमिति तदंतेयस्येनाहृशे मनुपंचकं स्यादित्यर्थः अत्राप्येवमेतद्यथा श्राहु

न्दपस्ते क्लिमांतवर्णेपकारेणयुगादितः सकारो बिंदुसंयुक्तो तेमंत्रा
वीदृशे मतौ १ ततो वैश्यउवाचेति स्वरैकादशाद्यादितः वह्निबीजे बिं
दुयुक्तमंतो स्यान्मनुपंचकं ४ मार्कंडेयउवाचेकस्तु तो मंत्रत्रयं भवेत्
नादिवर्णेयस्य भुवनस्वरयुग्वाहृणं तिमम् ५

न्यारभ्यानिष्ठुरमित्यंताः चत्वारः पवक्त्रो ।
काश्चेषु पूर्वन्यायेनादिमार्थीति मार्थे न सहितमध्य श्लोकत्रयेणपंचमे जंतंबोध्यम् ४ मार्कंडेयउवा
चैक इति मार्कंडेय उवाचेत्येको मंत्र इत्यर्थः ततस्तादिवर्णं तकारस्याद्दिवर्णो यस्य भुवनस्वर श्रोकार
स्तद्युक्तवाहृणेन चकारः स्तोतिमेय स्येनाहृशो मंत्रत्रयं भवेत् अत्रापि ततस्त्वावित्यारभ्य पार्थिवावित्ये
तच्छ्लोकाद्वौतिम श्लोकार्धयोः पृथक्करणेनमध्येकश्लोकेन मंत्रत्रयतं बोध्यं तद्वकं भवने श्रीसेद्धिता २
यां ततस्तावद्धमेतत्स्यादिति ५ ॥

राजोवाचेति राजोवाचेत्येको मंत्र इत्यर्थः ततो भक्तास्मादिर्पिषांता इति अंतेयोषितादृशाः षट्एंमंत्रा मता
ज्ञेया इत्यर्थः अत्रापि प्रथमोतिमार्थद्वयं हष्टश्लोकारंतेन षट्एंमंत्रेनं बोध्यम् भगवत्त्विदमर्थे स्यादिति इति
मार्थ खलु उवाचोतात्तये मंत्रा त्रेधमंत्रात्मिकाः पिपेदिति हर गौरीति नवचनात्मत्रं बोध्यं अथो
वाचेति अथानंतरम् ऋषिरुवाचेत्येको मंत्र इत्यर्थः तदनंतरं ज्ञानमस्तीत्यारभ्य सर्वे प्रवरे प्रवरी

मार्कंडेय उवाचैकस्ततो मंत्रत्रयं भवेत् नादिविष्णोश्च भवनस्वरयुग्याह एतेन्निमे ५ राजो
वाचेति षट्एंमंत्राभादितांताः स्तुभानने अथोवाच ऋषिर्ज्ञानमस्तीत्यारभ्यपार्वति ६ स
वैश्वरेश्वरीस्पंता मंत्रा हादशाकीर्तिताः राजोवाचेति भगवन्नादावेते विदांवर ७ मंत्र
त्रयमिदं ख्यातं पश्चाद्धर्षिरुवाच नित्यैव सा जगन्मातादौ प्रभरेते नष्टमंत्रका ८

स्पंता मंत्रा हादशा कीर्तिताः प्रथमाधिमध्ये दश श्लोका अवशिष्टमंतिमाधिमिलिता पूर्वन्याये
न हादशमंत्रा ज्ञेयाः ५ ६ राजोवाचेति राजोवाचेत्येको मंत्रः अथादौ भगवन्निति अंते विदा
वरेति नाहृश श्लोकहृये प्रथमाधि मध्य श्लोकांतिमाधीत्मकं मंत्रत्रयमिदं पूर्वन्यायेन ख्यातम्।
मित्यर्थः पश्चादृषिरुवाचेत्येको मंत्रः तत आदौ नित्यैव सा जगदिति अंते प्रभरिति हृष्टायेसप्तश्लो
कात्मकेषु प्रथमाधिमध्यश्लोकषट्कोतिमाधीत्मका अष्टमंत्रा इत्यर्थः ८ ॥

का॰ तं॰ ३

अथ ब्रह्मोवाचेति ब्रह्मोवाचेत्येको मंत्रः ततस्त्वं स्वाहा हव्यादिका महास्तवा इति नामाये चतुर्दश।
श्लोकास्ते पूर्वन्यायेन प्रथमार्धमध्यत्र यावद्दश श्लोकांतिमार्धात्मकाः पंचदश मंत्रा इत्यर्थः ९
अथर्षिरेवमिति ऋषिरुवाचेत्येको मंत्रः एवं स्तुता तदा देवी केशवांतिमाये षट् श्लोकास्ते प्रथमा-
र्धमध्य श्लोकपंचकांतिमार्धिकाः सप्त मंत्रा भवंतीत्यर्थः ततो भगवदुक्तिर्भगवानुवाचेत्ये-

अथ ब्रह्मोवाच ततस्त्वं स्वाहा स्वधादिमाः महास्तवांतिमा मंत्रा मताः पंच
दश प्रिये ९ ऋषिरेवं स्तुता तदा देवी मधुः केशवांतिमाः ततो भगवदु-
क्तिः स्याद्भवेतामिति भो मनुः १० अथर्षिर्वीक्षिताभ्यामित्येतन्मंत्रद्वय।
प्रिये ऋष्युक्तिश्चतत्रेत्युक्त्यादिमंत्रद्वयं भवेत् ११ ॥

को मंत्रः भवेतामद्य मे तद्दिति श्लोके स्वं डद्वयेन द्वौ मंत्रावित्यर्थः १० अथर्षिरिति
ऋषिरुवाचेत्येको मंत्रः वीक्षिताभ्यामिति वीक्षिताभ्यामित्यादिकमृतत्तं द्वयं भवेत्
वीक्षिताभ्यामयं मंत्रोऽर्धमंत्रो जलप्रदइति रुद्रो गौरी ततो [illegible] ततो यं मंत्रो

ननु सर्वश्लोकाः इहाध्याये कति जातास्तत्राह सर्वश्लोका इति इदं प्रथममध्याये सर्वश्लोकाश्चत
ष्पादात्मका अष्टयुक्सप्ततिरष्टाधिकासप्ततिर्मता इत्यर्थः मध्येर्धश्लोकमंत्रास्तु पूर्वोक्तप्रकारेण
चतुर्विंशतिरीरिताः इदमेव ज्ञापकं मध्ये मध्येर्धमंत्रकरणे १९ उवाचांताः कति संतीति तत्राह उवा

सर्वश्लोका इहाध्याये त्वष्टयुक्सप्ततिर्मताः मध्येर्धश्लोक
मंत्रास्तु चतुर्विंशतिरीरिताः १९ उवाचांतास्तत्र बोध्या मंत्रा
भुवनसंख्यकाः संहत्याऽऽतपोक्ते पाश्च तत्त्वैरधिकं शतम् १९
इति कात्यायनीतंत्रे सप्तशतीमंत्रविभागे विंशः पटलः २०

चांताः इति ऋषिरुवाच राजोवाचेत्यादय उवाच मंत्रा भुवनसंख्यकाश्चतुर्दश संख्या भवंति अस्ये
तत्संहत्याऽऽतपः कति जातास्तत्राह संहत्येति अस्यार्थः स्पष्ट एव १९ इति कात्यायनीतंत्रव्याख्या
यां विंशः पटलः २० ॥

का॰न॰
४

ईश्वरउवाच द्वितीयेऋष्युवाचेतीति द्वितीयाध्यायेऋषिरुवाचेतिप्रथमोमंत्रइत्यर्थः तेनसहाष्ट॰
षष्टिश्लोकमेलनेननवषष्टिश्चाकृतयोजातापकोनसप्ततिरितिफलितं श्राकृतिरित्येकवचनमार्षं
ततस्तृतीयेध्यायेहेदेवि॰के॰गुरुरूपिणिपाचेतिऋषिरुवाचेत्येकोमंत्रः १ ततःपंचत्रिंशतश्लोक

ईश्वरउवाच द्वितीयेऋष्युवाचेतिनवषष्ट्याकृतिःक्रमा
त् ततस्तृतीयेध्यायेतऋषिरुवाचेतिदेशिके १ पंचत्रिं
शन्त्रैवमंत्राःश्लोकश्चैयावसानने देव्युवाचेतिमंत्रांतेमंत्रश्लो
कस्ततःपरं २ ऋषेरुक्तिःपुनःश्लोकाःपंचमंत्राःसनातनाः
एवमाकृतयस्तत्रचत्वारिंशच्चतुर्युताः ३ चतुर्थेक्रमतोदे
विऋष्युक्तिःषट्चविंशतिः पुनस्तथैवऋष्युक्तिःश्लोकौ
द्वौमंत्ररूपिणौ ४ ॥

रूपामंत्राइत्यर्थः ततोदेव्युवाचेत्येकोमंत्रस्तदंतेएकोमंत्रश्लोकएकश्लोकात्मकोमंत्रइत्यर्थः २
ततऋषेरुक्तिः ऋषिरुवाचेत्येकोमंत्रः पुनःपंचश्लोकाःपंचमंत्राइत्यर्थः एवंप्रकारेणचतुर्युता
चत्वारिंशदाकृतयइत्यर्थः ३ चतुर्थेइति चतुर्थेध्यायेऋष्युक्तिः ऋषिरुवाचेतिमंत्रः ततःष

त्येकोमंत्रः ततोद्वौश्लोकौमंत्ररूपिणौ ४ ॥

स्त्रिंशतिश्लोकात्मकामंत्राः पुनरृषिरुवाचे
४

तन्मध्ये एवंस्तुतास्तैर्देवोतिमंत्रोऽतिगुप्तो भवति अतिपावनश्च भवति एतद्रहस्यं शिवज्ञानातिनास्मता
महर्षिगोचरम् ततो देवुवाचेत्येको मंत्रः ततो विचिंतयामिति षोडशाक्षरोर्धश्लोकात्मको मंत्र इत्यर्थः ५ देवा
ऊचुरिति देवा ऊचुरित्येको मंत्रः तमेवमङ्गा भगवन्नाकृतं सर्वमिति वदोकि यत्पर्यंतं वदेत्तत्राह मंत्रो
यमिति द्वादशाक्षाते उत्तरावर्णैस्त्वयुक्तश्चयुक्तः शतवर्णैः कः द्वादशाधिकशतवर्णात्मिकः सार्धत्रि
श्लोकात्मक इति यावत् तावत्पर्यंतमेको मंत्र इत्यर्थः इदमेकमंत्रविधानं कामनापरत्वेन केवलमंत्रजप

एवं स्तुते तिमंत्रोऽयमतिशस्तः सुपावनः देवुवाचेति विचिन्तामंत्रोऽयं षोडशाक्षरः ५ देवा
ऊचुस्तत श्लोकाभगवन्नाकृतं वदेत् मंत्रोऽयं शतवर्णैर्वा द्वादशेनतरयुक्पुनः ६

परतया क्वचिदुक्तं तत्सर्वौत्तमं भवतीति स्तवनाय प्रसंगादुक्तं नत्र सार्धत्रिश्लोकात्मकमंत्रेणैकाहुतिः क
र्तव्येत्यभिप्रायेण पटलांते वक्ष्यमाणसंख्यापाविरोधापत्तेः तस्मादत्रापि त्वेडं कृत्वा होमः कर्तव्यः तत्र भ
वने श्रीसंदिग्धायो भगवन्नेतदर्थं सर्वाशाश्रकं स्तुतमित्युक्त्वाऽङ्गवन्नाकृतं सर्वमित्यर्धश्लोकात्मक
एको मंत्रस्ततः श्लोकत्रयात्मकाः त्रयो मंत्राः इति बोध्यम् ६ ॥ ॥

का०त० ततोऋषीरुवाचेति ऋषिरुवाचेत्येको मंत्रः अनेतदंतेइति श्लोकादिनेत्यादयस्त्वतारः श्लोकायेस्तस्तावंतएवमं
५ त्राभवंतीत्यर्थः ७ सर्वाध्यायमंत्रसंख्यामेलयति श्लोकाश्चतथैंइति पंचविंशादिति पंचविंशतश्लोकात्मका
मंत्राः पंचोवाचाता अर्धार्द्धोष्पाः ततश्चार्धमंत्रद्वयमेलनेचत्वारिंशद् द्विपल्लाद्विचत्वारिंशान्मंत्राभवंतीत्य

ततोऋषिरुवाचांतइतिशस्तादिनेतिवे
चतः संख्योस्तयेश्लोकामंत्रास्तावंतगा
वदि ७ श्लोकाश्चतथैःध्यायेतपंचविं
शत्यरेश्चवरि अर्धमंत्रद्वयेनैवचत्वारिं
शाद्विपकपुनः ८ एवंमध्यचरित्रस्य
पंचाशान्नवशतोत्तरं तथापंचषुतंमंत्रा
मत्स्यलक्ष्म्याविभेदतः ९ इतिकात्या

यनीतंत्रे एकविंशः पटलः
२१

र्थः ८ मध्यमचरित्रसंख्यांमेलयति एवंमध्यचरित्रस्येतिस्पष्टं ९ प्रथमेशातंतडनंतरंपंचषुतंपंचा
शादित्यर्थः १५५ इतिकात्यायनीतंत्रेकाश्येएकाविंशःपटलः २१ ॥ ॥ ॥ ५

पंचमाध्याये ऋषिरुवाचेतीति ऋषिरुवाचेत्येको मंत्रः ततः पुराइत्यारभ्य विस्मयायां प्रत्युत्तुरि
त्यंताः श्लोकरूपाः षण्मंत्रा भवंतीत्यर्थः ततो देवा ऊचुरित्येको मंत्रः १ नमो देव्यादीति नमो देव्यै
इत्यारभ्य विनम्रमूर्तिभिरित्यंताः श्लोकास्त्रिंशद्भवंतित्यर्थो विस्मायेति शाह्नितेत्यादिर्थांतिरूपे
णसंस्थितेत्यंतिमापतत्पदद्वयदत्तापे मंत्रापक विंशति संख्याकास्ते खंडत्रयेण त्रिषष्टिर्भवंतीत्यर्थः : २
कथं खंडत्रये कर्तव्यामिति चेत्ताह श्रवतारैरिति पतत्पदलब्धाकैः षट्पड्-मंत्राः कर्तव्याः खंडत्रयं

ऋषिरुवाचेति पुरा विस्मायां प्रत्युत्तुः षण्मंत्राः श्लोकरूपास्ते देवा ऊचुस्ततः परं १ नमो दे
व्यादिनः श्लोकास्त्रिंशद्द्विनम्रमूर्तिभिः विस्मायादितोथांतिरूपाते त्रीणि षष्टिपुक
२ श्रवतारैः षट्पड्-मंत्रास्तिषां त्रिषष्टिराकृतिः ॥

कर्तव्यं तत्राकारेणावर्णसमग्रहणं तेनच
षोडशसंख्यालभ्यते वकारेण वररुचिसंकेतेन चतुःसंख्याया ग्रहणं मिलित्वा विंशमपित्या १८
दिनम्रस्तेपर्यंतं विंशत्यक्षरात्मकः प्रथमः खंडः तारेइति तकारेण षट्संख्याया ग्रहणं रकारे
ण द्विसंख्याया मिलित्वा ष्टाक्षरात्मको द्वितीयः खंडः पश्चात्तत्र यथानुरोधेनायं द्वितीयः खंडः श्रा
नत्याः पिदेदानरो न नमो भ्यो महालक्ष्म्याः श्रतोषकृत लक्ष्मी सूक्ते न तापाह्नेनायमेवाग्रेतेषिवे

कां॰ ज॰ ९

त्रिंशे पटले वचनात् तृतीयखंडोस्येयः नमस्तस्यै इति तद्वितीयखंडः एवं शतिश्लोकेस्य एवत्रायेत्र्योमं
त्रांस्तेषां त्रिर्द्धिर्हिता ऋतिराकृत्वोस्तेयाइत्यर्थः इस्मेम्लाद्वरणंत्रानराह्व मंत्रत्रयेलयोगमवत्साकेनरवे।
न्त्रास्पितया देवी सर्वभूतेषु विष्णुमायेति शब्दिता नमस्तस्यै नमस्तस्यै नमो नम इति वत्र्यविंशत्यवरो मंत्रस्तिवारस्त्व

इंद्रियाणामधिष्ठात्री लोकः श्लोकात्मकः परः ३
चितिरूपेण मंत्रेण प्याकृत्विशयमच्चरेत् एवं मं
त्रा अष्टौ तिस्त्रिशतैः सहस्रोरेश्वरि ४ ॥ ४

त्वा सा कृतित्रये भवतीति तत्केन गुरुणा बोधितमिति सप्तवप्रष्टव्यः तथा व्यविंशत्यक्षरः अथमोमंत्रोद्दिती
यश्चतुरक्षरः श्रष्टादशस्तृतीयो मंत्र इति सिद्धं इंद्रियाणामधिष्ठात्रीति ॥ अथमेकश्लोकात्मको मंत्रः
चितिरूपेणेति चितिरूपेण या कृत्स्नमिति मंत्रेण प्रयोक्तव्या आकृतित्रयं कृर्यादित्यर्थः एवं मंत्रा

अथ कालितलक मत्रविधिमंत्रमेलते प्रणीतिमिमंत्रामंत्रवंतीत्यर्थः ८

हृदि शिरसा पायेन्याद्रितः सर्वैः स्तयोदशमंत्रैः सदृपदमे ३

अथ प्रथमोक्तमुवाच मंत्रद्वयं मेलयित्वा अष्टमीति संख्यां संपादिनेति बोध्यम् ततइति स्तुतेति युगलं स्तुता सुरैरै
रित्यादिकं मंत्रद्वयमित्यर्थः ऋषिरुवाचेत्येको मंत्रः पर्वं स्तवादियुक्तानामित्यारभ्य तयाकस्मान्न ग्रस्तेइत्यंतं
सप्तदश मंत्रा इत्यर्थः ५ ऋषिरुवाचेत्येको मंत्रः ततो वै निषुधेनतिश्रोतिनिशम्यैनि वचः शुंभइत्यादिभिस्त्रि
भिः श्लोकैर्मंत्रास्त्रयः षड्भेदाः प्रकीर्तिताः षड्भेदेत्युपरंजकतया विशेषणम् ६ अथ दूतेति दूतउवाचेत्येको

तत्र स्तुतेति युगलमृषिरुवाच स्तुत्यथ पर्वं स्तवादियुक्तानां तयाकस्मान्न ग्रस्तते ५ मंत्राः सप्तदशैते तत
ऋषिशुंभो निशुंभोनिवै इत्यादि त्रितये मंत्राः षड्भेदाः प्रकीर्तिताः ६ अथ दूतउवाचेति देवि दैत्ये।
श्वरस्ततः इत्याद्या नव मंत्राश्च पुनर्ऋषिरुवाच ह ७ इत्युक्तेत्यादि मंत्रेणैकेन च सरस्वती देव्युवाच
ततः श्लोकाश्चत्वारो मंत्रभेदतः ८ अथ दूतउवाचेति गौरवामागमिष्यसि मंत्रामू शुतः संख्यकास्तदे
व्युवाच ततः परं ९ मू

मंत्रः देवि दैत्येश्वर इत्यादयो नव मंत्राः ऋषिरुवाचेत्येको मंत्रः ७ इत्युक्तेत्यादीति इत्युक्ता सा तदा देवी
त्येकेन श्लोकेनेवेह सरस्वती शप्यतइति शेषः सारस्वतपदोयं मंत्रइति भावः ततो देव्युवाचेत्येको मंत्रः
ततः श्लोकाश्चत्वारो मंत्राः ८ अथ दूतउवाचेति दूतउवाचेत्येको मंत्रः गौरवामागमिष्यसीत्यंता श्वतः सं
ख्या मंत्राः देव्युवाचेति षट्कं ॥ १५ ॥

का॰न॰ ७

एवमिति एवमेतद्बलीस्युंमद्भत्वारम्पसच सुकृतं करोतयादित्यंतेमंत्रद्वयं एवंरीत्याते सर्वे स्लोका अथ वनवसं।
त्वा अंगमंत्राश्चत्वनवसूक्तः समसंख्योबोधकोलक्षणायावदधमाण संख्योन्तरोपात् अंगशाद्वेणारं
भवाचकः अंगंत देहावयवेपुंस्पारंभेप्रकीर्तितमिति कोषात्तथा चारंभमंत्रा इत्यर्थः तेच ऋषिरुवाचदेव्यु

एवमेतद्वलीस्युंभः सचसुकृतं करोतयत् इति मंत्रद्वयंस्लोका अंगमंत्राश्चतेनव १० एकोनत्रिं
शच्छताद्धिका मंत्ररूपकाः ऋषिरुवाचेत्याकर्ण्य स्लोकाश्चत्वारईरिताः ११ पुनर्ऋषि
रुवाचेति तेनाज्ञानमस्तुतः परम् मंत्रत्रयमिदंप्रोक्तं देव्युवाचेति वै ततः १२ १२ १२

वाचेत्यादयः सर्वेमंत्रा मिलित्वा तस्मिन्नध्याये ये ते एकोनपंचाशत्संख्या मंत्राः पूर्वोक्ता अष्टशीतिमंत्राश्च
समिलित्वा शताधिका एकोनत्रिंशन्मंत्रका जाता इत्यर्थः १० तत्र षष्ठेध्याये ऋषिरुवाचेत्याकर्ण्येति
ऋषिरुवाचेत्येको मंत्रः ततइत्याकर्ण्याद्याश्चत्वारः स्लोका मंत्रा ईरिताः ११ पुनर्ऋषिरुवाचेति ऋषि

ऋषयोऽङ्गं देव्युवाचेत्येको मंत्रः १८

८ देव्युवाचेत्येको मंत्रः तेनाज्ञानमयं तं ह्रीमित्यादि ह्रीं

दैत्येश्वरेणेति दैत्येश्वरेण प्रहितः तइत्येको मंत्रः अथो अनंतरं ऋषिरुवाचेति मंत्रः अथानंतरं मि
त्युक्तो तेइत्युक्तपदस्यांते सोभ्ययावत् इतिपद इत्यादितदादयो द्वादशश्लोके स्युस्त्येष्वादेवता
कृतयो भवंति १२ आदित आकृतीः कथयति चतुर्विंशतिभेदा इति षष्ठेध्याये चतुर्विंशतिसं।
ख्या आकृतय इत्यर्थः १४ ततः समनमाध्यायीकऋष्युक्तिरिति ऋषिरुवाचेत्येको मंत्रः तत आरम

दैत्येश्वरेणप्रहितः तएकोमंत्रः प्रकीर्तितः अथो ऋषिरुवाचाथेत्युक्तो तेसोभ्ययावत १२
इत्यादिद्वादशश्लोकाः षष्ठेध्याये प्रकीर्तिताः चतुर्विंशतिभेदा स्युर्देवताकृतयः क्रमा
त् १४ ऋष्युक्तिराद्यमेत्यादि त्रयो विंशतिमातरः ऋषिरुवाचतावानीतोमंत्रभेदह
ये क्रमात् १५ सप्तविंशत्यदोदेविभवंत्याकृतयः क्रमात् अत्राध्यायद्वयेदेविपूर्वा
ही इति प्रकीर्तिता १८

इत्यादि आक्रमात्तेन तेदैत्याइत्यादयस्त्रयोविंशति संख्यामातर कृ आकृतयो भवंतीत्यर्थः ऋ
षिरुवाचेत्येको मंत्रः तावानीता विति मंत्रद्वयम् १५ सप्तविंशादिति हे देवि सप्तदशा आकृतयः
सर्वाः सप्तविंशति संख्या भवंतीत्यर्थः अत्राध्यायद्वये पूर्वाह्वी देवता तद्रूपास्त के वेदमध्याय

का॰त॰
८

ऋषिश्छंदेवनिहतेति अष्टमाध्याये ऋषिरुवाचेत्येको मंत्रः छंदेवनिहतेइत्याद्यध्यायावसानकं
अध्यायांते त्रिपञ्चाशत्तयः श्लोकास्तन्मध्ये एकैवार्धश्लोकाकृतिरन्याः श्लोकरूपाः एकपञ्चाशत्संख्याः
आकृतयः ऋषिरुवाचेत्येकाकृतिः मिलिता त्रिपञ्चाशत्तयः तत्र प्राकृतमंत्रस्य श्लोकात्मकस्य
विच्छेदकरणापेक्षया ते विद्यमानस्यैवार्धस्य हतेमात्रगणनाइत्यस्य मेवतत्सूचितं १७ २

ऋषिश्छंदेवनिहतेइत्यथाध्यायावसानकं त्रिपञ्चाशत्तयः श्लोकाः एकाद्यर्धीकृ
तिस्तथा १७ रक्तादन्यादेवता अष्टौ देवतास्तु प्रकीर्तिताः राजोविचित्रमित्या
दिश्लोकद्वयमदाद्यतं १८ ऋषिस्तुकारकोपंक्तीत्यादिश्लोकस्वरूपतः स
र्वविंशाश्चविज्ञेया देवतामंत्ररूपतः १९ एकचत्वारिंशादिति आकृतिर्नवमेऽस्तु
देवताभैरवीनाराद्युक्तगोप्यंवराननेने २०

काद्यादिति देवीलक्ष्मीशान्तिस्तत्तायारक्ताद्या भ्रामर्या या अष्टौ शाक्तयो देवता अस्मि
न्नध्याये भवंति तदुपासकैरयमध्यायो नियमेन पठनीय इतिभावः नवमेऽध्याये राजो
विचित्रेति राजोवाचेत्येकः विचित्रमित्यादिश्लोकद्वयं १८ ऋषिस्तुकारेति ऋषि
वाचेत्येकः चकारकोपमित्यारभ्य श्लोकरूपाः सप्तविंशन्मंत्राः १९ एकचत्वेति सर्वा

८ आकृतयो नवमाध्याये एकचत्वारिंशाद्धु
वंति अस्याध्यायस्य भैरवीनारादेवतोतिपूर्ववत् २०

दशमेऽध्याये ऋषिर्निशुंभमिति ऋषिरुवाचेत्येको मंत्रः निशुंभं निहतमित्यादि द्वयं मंत्रद्वयं भवतीत्य
र्थः ततो देव्युवाचेत्येको मंत्रः तत एकैवाहमित्याद्यौ अन्तु ममो द्वौ मंत्रावित्यर्थः २१ पुनर्देव्येकेति
पुनर्देव्युवाचेत्येको मंत्र इत्यर्थः तदुत्तरमेकमंत्रेण अहं विभूत्येति मंत्रेण सह पूर्वोक्ता अष्टौ मंत्राः
संपन्नाः ऋषिरुवाचेत्येकः ततः प्रववृते इत्यादि सार्धद्वाविंशतिमंत्रा भवंति तत्र द्वाविंशत् श्लोक

ऋषिर्निशुंभं निहतमित्यादि द्वयमंत्रकं ततो देवीति मंत्रो द्वावेको वाहमनन्तमौ २१
पुनर्देव्येकमंत्रेण ह्यष्टौ मंत्रा उदाहृताः ऋषिस्ततः प्रववृते सार्धद्वाविंशतिर्मताः २२
द्वाविंशत्यनवस्त्रास्त्वेकोऽर्धमन्त्रमतः दशमे त्रिंशन्मालीनां शूलपाशविधारिणि २३
मन्त्राश्चतुर्भुजा वाणचापहस्ताः शुभेक्षणाः इति कात्यायनीतंत्रे द्वाविंशः पटलः २२
ऋषिः स्वमेधा विख्यातः प्रोक्तो देव्या हते शुंभे चतस्त्रिंशत् यास्तु श्लोका मंत्रास्तु संख्य
काः स्मृताः १

त्रपा मंत्रा नज्वलद्दुा मय इति एकोंति मोऽर्धमन्त्रः अस्मिन्नध्याये सर्वे मंत्रा द्वात्रिंशाद्भवंतीत्यर्थः दशमेइ
त्यादि [illegible] पूर्ववत् ज्ञेयम् २२ इति कात्यायनीतंत्रप्रकाशे द्वाविंशतितमः पटलः २२ ॥ ऋषिः स्व
मेधेति एकादशे ऋषिरुवाचेत्येको मंत्रः देव्या हते इत्यारभ्य चतुस्त्रिंशत् श्लोकास्तावन्त एव मंत्रा

का॰ त॰
५

ततइति देव्युवाचेतिमंत्रः एकेनवरदाहमित्युत्तरमंत्रेणयुक्तः तथाचमंत्रद्वयंबोध्यम् देवाऊचु
रित्येकः सर्वाबाधाप्रशमनमित्युत्तरैकमंत्रेणयुक्तस्तेन मंत्रद्वयं फलितं २ देव्युवाचेत्येकोमंत्रः
ततोवैवस्वतेंतरेप्राप्तइत्यादयश्चतुर्दशश्लोकामंत्राः ३ पंचसंयुताः पंचाशदाकृतयोऽर्धमंत्रे

9

ततोदेव्येकमंत्रेणवरदाहंसुरेश्वरि देवाऊचुस्ततः सर्वाबाधाप्रश
मनंतथा २ श्लोकेनैकेनदेवेशिदेव्युवाचततः परम् वैवस्वतेंतरेप्रा
प्तेत्यादिश्लोकाश्चतुर्दश ३ सार्धासर्वाकृतिर्देविपंचाशत्पंचसंयुता
वैसवीचसंयुता वैस्रवीदेवताप्यत्र महा गरुडवाहना ४ देव्यु
वाचेतिचततएभिःस्तवैश्चमांतदा इत्येतत्पर्धेन सहिता ग्रहाविंशा।
निरूपकाः ५
एतसहिता अस्मिन्नध्यायेभवंतीत्य र्थः सर्वार्धमंत्रोर्धादवशिष्टपदवैस्रवीदेवता
एवंवह्नोध्या ४ देव्युवाचेतीति देव्युवाचेत्येकोमंत्रः ततएभिःस्तवैश्चमामित्यारभ्यहृत्सादेवप
लायतेइत्यंतिमार्धेनसहिता ग्रहाविंशातिसंख्याविशिष्टश्लोकरूपमंत्राबोध्याः ५ ॥ ५

ततश्चेति ऋषिरुवाचेत्येको मंत्रः ततइत्युक्त्वा सा भगवती श्लोकमादित आदौ कृत्वा प्रथमार्धश्लोकेन
सहिता येन वश्लोकास्ते सप्तसंख्याकाः कृता यो भवंतीत्यर्थः तदुक्तं कात्यायनी तंत्रे इत्युक्तेत्यर्ध मंत्रो यंज
पात् पुरोर्थप्रदायकः इति ६ सर्वाध्यायाकृतेः कथयति एवंतितिस्त्रहे ततस्त्रयोदशोइति ऋषिरुवा
चेत्येको मंत्रः ७ एतत्ते कथितं भूपेति एतत्ते कथितं भूपेत्यारभ्यातिमार्धेन सहितयत्त्रयं श्लोकानांत

ततश्चर्षिरुवाचो तदइत्युक्त्वा श्लोकमादितः अर्धयुक्तनवभिः श्लोकैर्मंत्रास्तत्संख्यका मताः
६ एवंत्रयोदशोध्यायेएकचत्वारिंशदाकृतिः ततस्त्र
योदशोध्याये ऋषिरुवाच इत्यर्थः ७ एतत्ते
कथितं भूपेत्यादि सार्धत्रयं मनुः

मार्कंडेयउवाचेति
इतितस्य वचोदितः ८ ॥

न्मनुः सार्धास्त्रयः श्लोकात्मका मंत्राइतियावत् मार्कंडेयउवाचेत्येकः इतितस्य वचोदित आर्षप्रयोगः
आदितइतिछेदः आदितः प्रथमतः इतितस्य वचः श्रुतेत्यर्धात्मक एको मंत्र इत्यर्थः ततश्लोकषट्
कं सार्धपंचमंत्रात्मकं भवति स्पष्टीकृपदयातीतित्यायनार्धश्लोके पि श्लोकव्यवहारः ततपंचश्लोकरू
पा मंत्रा अर्धश्लोकएको मंत्रो मिलिताः षण्मंत्रा भवंतीत्यर्थः २२ ८ ॥

का॰ त॰
१०

देव्युवाचेत्येको मंत्रः यत्त्वार्थ्यते त्वया भूपेत्येकः अत्र विशेषमाह श्लोके नैकेनेति अनेनैव श्लोकेनासकृ-
दावर्तितेन श्रीभगवती तोषकृद्भवतीत्यर्थः तेन चाचार्यमंत्रत्वेन स्वीकर्तव्यमिति तात्पर्यं ९ मार्कंडेय
उवाचेत्येकः ततो वव्रे नृपो राज्यमित्यादि मंत्रद्वयं देव्युवाचेत्येकः स्वल्पश्लोकत्रयेण स्वल्पपदादि श्लोक
त्रयेण त्रयषडाकृतिः षडाकृतयो भवंतीत्यर्थः ननु श्लोकत्रये कथं षडाकृतिरित्यत आह अत्राद्धीनामेव

श्लोकषट्कं ततो देवी वाक्यं स्यात्परमेश्वरि यत्त्वार्थ्यते त्वया भूप श्लोके-
नैकेन तोषकृत् ९ मार्कंडेय उवाचेति ततो वव्रे मन्त्रद्वयं देव्युवाच पु-
नश्चैव स्वल्पश्लोकत्रयेण वै १० अर्धीनामेव मंत्रत्वाद्भवेत्त्रयषडाकृ-
तिः ततो मार्कंडेय इति इतिदत्त्वा तयोरिति ११ द्वौ मंत्रौ पुनरुच्चा

मंत्रत्वादिति अर्धैर्मंत्रषट्केन षडाकृतयो भवंतीत्यर्थः १० ततो मार्कंडेयेति मार्कंडेय उवाचेत्येको
मंत्रः इति दत्त्वा ततो रिति इति दत्त्वेत्यर्द्धश्लोकः एवं मंत्र इत्यर्थः पुनरनंतरं द्वौ मंत्रौ बभूवांतर्हिता सद्य
इत्येकः श्लोकात्मकः एको मंत्रः सूर्याज्जन्म समासाद्येत्यर्धात्मको द्वितीयो मंत्रः तौ द्वौ मंत्रावुच्चार्यांते सा- १०
वर्णिर्भविता मनुरित्येकपादात्मकं मंत्रं अंते पठेदिति शेषः ग्रंथसमाप्तिबोधकं पठेत् तस्याकृतिरित्य

पर्वंत्रयोदशेऽध्याये इति इदं सर्वं ज्ञात्वेति होमतर्पणकर्माणि तु तज्ज्ञात्वेति होमादिषु सप्तशातमं
त्राः कर्तव्या इत्यर्थः तेन कामनानुसारेण एकद्वित्रिमंत्रजपेनाद्यं मंत्रविग नियमो यथा दुर्गे स्मृते
त्यादिके वत्समंत्राणां जपादिष्विति बोध्यं अत एव भगवत्या कृतमित्यारभ्य सार्धत्रिश्लोकात्मक
एको मंत्रो भगवता सर्वमुक्त इति बोध्यं १२ सत्यं प्रदायेति तदुक्तं भवनेश्वरीसंहितायां इयं सप्त
शती देवी ज्वलद्वह्निरिव संशयः सत्यदत्ता यस्मादन्ययाग्दहृदाहृक्षादिति १४ इयं का

पर्वंत्रयोदशेऽध्याये होमतर्पणकर्माणि शतानि सप्त संख्यानि श्लोकानि नव शैलजे
१३ मकारादिर्नकारान्तो मन्त्रः परमदुर्लभः सत्यं प्रदायविधिना ज्ञातव्यो मम व
ल्लभे १४ अन्यथा विफलो मंत्रः सत्यं सत्यं मयोदितं इति श्रीकात्यायनीतंत्रे त्र
योविंशः पटलः २३ ॥

त्यायनीतंत्ररहस्यार्थं लब्ध्वेन गमे सप्तशत्या सत्ययुगमारभ्याद्यपर्यंतं सर्वदेशीयैः सर्वशिष्टैरु
च्छिते सत्यार्पित मन्त्रगम मनाहत्यो न्मत्तवक्त्रे विदुष्मवती शुभ्रे प्रकल्पिते यथा सोऽपि तथा तदा तत्र
८ त्वर्धश्लोकात्मको मन्त्रः तथा किन्तु तेषां कथं ते किन्त्वर्धश्लोककोमन्त्र तथा तेषां सतेक
श्री॰ पु॰ रोमीति द्वावर्धश्लोककौमन्त्र इत्यादि सर्वं २३

का·त·
९

त्रत्वमप्रशस्त्यां मंत्राणां प्रमाणाभावेनाकुलीभावः कृतस्तथाप्येतैः पिटीकाकारैः कुविंदादिष्वोकप
वाधिमंत्रत्वं कुचिन्मध्यश्लोकपदार्थमंत्रत्वं स्वीकृत्य सर्वस्त्रमप्रशस्तीमंत्राणामाकुलीभावः कृतस्तेनच
सर्वानुष्ठानेषु लोकैरयमंः कारिस्ताद्दृशणाथमंचारिणां कागतिर्भवेदिति परमेश्वरएवजानाति।
ति ननु किमिदं मंत्रत्वं मननत्राणरूपत्वमितिचेन्न तस्य ब्राह्मणेष्वतात्मंत्रत्वमतिव्याप्तं भवेत् वि।
हितार्थाभिधायको मंत्र इत्युक्ते वसंतायकपिंजलानालभत इत्यस्य मंत्रस्य विधिरूपत्वादव्याप्ति
रितिचेन्नैवं प्रयोगस्य कारायं मंत्रमितिव्यवहरंतितस्यैव मंत्र इति समाख्यानस्य निर्दोषलक्षणत्वात्
स्वीकृतं चैतज्जैमिनिना तच्चोदकेषु मंत्राख्येति सूत्रेण मीमांसायां अस्तिचसमप्रशस्तीमंत्रेपिशि
वस्य मंत्रत्वमिति व्यवहारः स्यादेतत् जैमिनिना अर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे
स्यादिति सूत्रेणैकवाक्यत्वलक्षणमभिहितं तस्यायमर्थः यद्विभागे साकांक्षमविभागे चैकार्थं त
देकं वाक्यमिति तत्र विभागे साकांक्षमित्युक्तेति व्याप्तिः स्यात् स्योनं ते सदनं कृणोमि घृतस्य
धारया सुशेवं कल्पयामि तस्मिन्त्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इति अत्र त
स्मिन्सीदेत्यादि पदसमूहस्य विभागे सति निराकृतत्वाच्चित्तदुह्निर्णयात्पूर्वपदसमूहः साकांक्ष
त्वमस्ति तत् व्यवच्छेत्तुमेकार्थमित्युक्तं तेदि तच्चैकार्थत्वमस्ति पूर्वार्थस्य सदनकरणमर्थः उ
त्तरार्धस्य पुरोडाशप्रतिष्ठानं स्योनं समीचीनं सुशेवं सुष्टु सेवितुं योग्यं मेध सारपुरोडाशेत्य

र्थः अत्र द्वयोः समूहयोर्वा काद्वयत्नम्भयमादिसिद्धं तदेकार्थमित्यनेन व्यावर्त्यते एकार्थमित्युक्ते
ऽतिव्याप्तिः स्यात् भगो वो विभजन्तपूषा वो विभजतु अनयोर्विभिन्नमंत्रत्वेनसमंतत्वेन पदसमू
हयोस्तात्पर्यविषयस्य द्वयविभागरूपस्यार्थस्यैकत्वात् यावद्धू त्वं विभागे साकांक्षमित्युक्ते
तथापि मंत्रत्वपर्याप्त्यधिकरणैकवाक्यत्वयोः सामानाधिकरण्यव्याप्त्या न्नादृशार्थश्लोका
नामन्वेषणेऽसोचिंतयमदातत्रेत्येवमादयपवार्थश्लोकाः संभवन्तीति चेन्नदसत् अव्याप्तेति।
व्याप्तिदोषस्य दुष्परिहरत्वात् ॐ फडादिमंत्रेषु मंत्रत्वेप्येकवाक्यत्वाभावात् ब्राह्मणग्रंथेपक
वाक्यत्वेपि मंत्रत्वाभावात् तथा च तादृशसमानाधिकरण्यस्याक्वचित्त्वेपि सर्वत्रासत्वात्
किं च त्रयो दशोध्याये स्वस्त्येरह्णे भिन्दे पतेइत्यादि श्लोकत्रयेण परस्परापेक्षितानां षड्ज्ञानो
षण्मंत्रस्वीकारेण भगवता नानियमस्य स्वीकाराच्च किंच पूर्वोक्तवचनैः सर्वत्र निर्वाहे जाते
नन्निमित्तस्वीकारे उपयोगाभावाच्च वक्ष्यमाणकारिकादिदोषस्य दुष्परिहरत्वाच्च तस्मान्मंड
कार्थपदसाधीयानिति सुधियो विभावयंतु अत्र केचिदनुगमैकरसिका एवमाहुः ये समश
स्यामहस्तनुत्तरपंचपातश्लोकाः संतितत्र यत्संख्य श्लोकमध्ये उवाचांतमंत्राः संति तत्रोवा
१५ चांतमंत्रविभागस्य दर्शितत्वाद् उवाचांतमंत्रपूर्वोत्तरभागस्यार्धश्लोकद्वयस्य मंत्रद्वयत्वेबोध्य

यथा प्रथमचरित्रेऽष्टादशश्लोकान्तिमश्लोकमध्ये वैश्य उवाचेत्युवाचान्तमन्त्रोऽस्ति तत्र पूर्वोत्तरार्धश्लो
कद्वयस्य मन्त्रद्वयत्वेन प्रत्युवाच स तं वैश्यः इत्यादिरर्धमन्त्रः वैश्य उवाचेति चैको मन्त्रः समाधिना
म वैश्योऽहमित्याद्यर्धात्मकश्चैको मन्त्र एवं सम्प्रदायाप्त्या सर्वत्रानुगमः यत्र वाध्यायान्तेऽर्धश्लोकः स
भावत एव पतति यथा ज्ज्वलच्चाग्नयः प्रणेमा इति तथा हते महासुरे तस्मिन्नन्नतीसद्दु-
मदोद्धत इति तत्रार्धश्लोकात्मक एव समन्त्रोऽध्यायः प्रथमचरित्रान्ते ऋषिरुवाचेत्युवाचम
न्त्रस्तु पूर्वश्लोकान्ते उत्तरश्लोकादौ च पतितो न श्लोकमध्ये इति न पूर्वोत्तरार्धयोर्मन्त्रद्वयत्व
एवं सम्प्रदायप्राप्त्या विना प्रमाणं सम्प्रदायागतमन्त्रविभागो नानुगमेनैव सिध्यति अयं चानुगमः स्तो
त्रकारेणैव श्लोकमध्ये उवाचान्तमन्त्रकरणेन दर्शित इति तत्र वदामः स त्वायमनुगमो
भवतो यदि कात्यायनीतन्त्रवचनविरुद्धो न स्यान्न देवतद्वृष्टं तथाहि भवदनुगमानुरो
धेन त्रयोदशाध्याये सत्यैरष्टाभिर्न्त्यपते इत्यादिश्लोकत्रयं तद्द्वयं भवति कात्यायनीत
न्त्रानुरोधेन तु मन्त्रषट्कं भवति ततश्च कात्यायनीतन्त्रविरोधो दुरुद्धर एवेति मदुक्तमेव
पंथा रमणीयः सुधियो विभावयन्तु तत्र यदि शिष्टास्तमनुगममाश्रित्य तदनुगमा
नुरोधेन सम्प्रदायागतमन्त्रविभागं स्वीकुर्वन्ति तर्हि वयमपि स्वीकुर्मो नास्माकमाग्रहः इति १२

12

हंसः सारं यथादत्ते सारासारविवेकः त्यक्त्वासारं तथा सारमंगीकुर्वंतु पंडिताः अथास्य सप्तशत
मंत्रविभागस्य प्राचीनोक्ताः कारिका लिख्यंते मार्कंडेय उवाचेति प्रथमो मंत्र ईरितः ततो मंत्राः
सप्त सार्धप्रथम श्लोकात्मकस्ततः १ वैश्यवाक्यं ततोर्धं स्यात्ततो मंत्रास्त्रयः स्मृताः कथं तदित्यर्ध
र्धं स्याद्राजोवाचेति मंत्रकः २ ततश्चार्धद्वयं मंत्रो वैश्योक्तिस्तदनंतरं ततोर्धमंत्रः संप्रोक्तस्त्र
यः श्लोका मनुत्रयं ३ करोमि किं यदर्धं स्यान्मार्कंडेयवचस्ततः ततस्त्वाविदमर्धं स्यादेकश्लो
कात्मको मनुः ४ उपविष्टावित्यर्धमंत्रो राजोवाच मनुस्ततः भगवन्निति वार्धं स्याच्चतुःश्लो
कीं च तद्द्वयं ५ ममास्येत्यर्धमंत्रः स्यान्मुनिवाक्यं ततः परं ज्ञानमस्तीत्यर्धमंत्रो दशमंत्राः
स्ततः परं ६ संसारेत्यर्धमंत्रः स्याद्राजोवाच मनुस्ततः भगवन्केत्यर्धमंत्रो मनुः श्लोकात्मक
स्ततः ७ तन्नैवमर्धं मुनिवाक्यं नित्यैवेत्यर्धमंत्रकः षण्मंत्रास्ततः प्रोक्ता निद्रामित्यर्धमंत्रकः ८
ब्रह्मोवाच ततोर्धः स्यात्त्रयोदश ततः परं बोधश्चेत्यर्धमंत्रः स्यान्मुनिवाक्यं ततः परं ९ एवं स्तुतेत्य
र्धमंत्रः पंचमंत्रास्ततः परं उक्तवंतौ वर्धं मनुर्भगवद्वाक्यमेव च १० भवेतामिदमर्धं स्यात्किमन्येनेति
वार्धकं मुनिवाक्यं पुनश्चार्धं ततः स्याच्छ्लोकमंत्रकः ११ मुनिवाक्यं ततो मंत्रौ द्वौ प्रोक्तौ चरमौ परौ
इत्येवं प्रथमेध्याये मंत्राः संख्यासमीरिताः १२ इति प्रथमोध्यायः १ द्वितीये ऋषिवाक्यं स्याद्दश
ष्ट एवं स्मृता तृतीये मुनिवाक्यं तु पंचत्रिंशत्तथा एवः १ देवीवाक्यं ततश्चैकः श्लोको मुनिवच

का॰त॰
१३

13

स्तथा पंचश्लोकास्ततो मंत्रास्तृतीयोध्यायईरितः २ चतुर्थे मुनिवाक्यं तु षड्विंशतिस्तथा एवं मु
निवाक्यं ततो मंत्रद्वयं देवीवचस्तथा ३ अर्द्धश्लोकात्मको मंत्रो देवाश्चैवस्ततः परं भगवत्येतदर्थ
मंत्रस्ततः श्लोकत्रयं स्मृतं ४ मुनिवाक्यं वेदमंत्राः स्यादध्यायोथ पंचमे मुनिवाक्यं चतुःश्लोका
देवाश्चैवस्ततः परं ५ पंचश्लोकास्ततो मंत्रा यादेवीत्यादितः पुनः शांतिदेव्यतिमा मंत्रा एक
विंशतिरीरिताः ६ तेषां खंडत्रये लोकाः त्रिषष्ट्याकृतयोभवन् त्रिंशत्सत्तरपर्यंतं प्रथमः खंड
ईरितः ७ वेदान्तरो द्वितीयस्तु तृतीयोशान्तरः स्मृतः इंद्रियेत्येकमंत्रः स्यात्त्रिनिरूपेति चत्र
यं ८ पूर्ववच्च ततो मंत्रौ द्वौ मुनेर्वाक्यमेव च सप्तमेध्यायमंत्राः स्युर्मुनिवाक्यं त्रया एवं ९ इत
वाक्यं नवश्लोकात्मनेवीकात्मकात्मनः देवीवाक्यं वेदमंत्राद्भूतवाक्यं ततः परं १० चत्वारस्तु
पुनः श्लोका देवीवाक्यं मन्त्रद्वयं अथ षष्ठे मुनेर्वाक्यं चत्वारः श्लोकमंत्रकाः ११ सप्तमे पुनर्मुनि
वाक्यं त्रयोविंशतिमंत्रकाः मुनिवाक्यं चमे त्रौ द्वौ भवेतामष्टमे ततः १२ मुनिवाक्यं त्रिषष्ट्या
स्यात्साकृतयोर्थाकृतयोर्थाकृतिस्तथा नवमे राजवाक्यं तु श्लोकद्वयमतः परं १३ मुनि
वाक्यं ततः सप्तत्रिंशत्श्लोकास्तु मंत्रकाः दशमे मुनिवाक्यं तु मंत्रद्वयमतः परं १४ देवी
वाक्यं च मंत्रौ द्वौ पुनर्देव्येकमंत्रकः मुनिवाक्यं ततो द्वाविंशत्याकृतयईरिताः १५ अर्द्धमं १३
त्रोंतिमः श्लोकास्तु तु एकादशे पुनः मुनिवाक्यं चतुस्त्रिंशत्श्लोकदेवीवचस्ततः १६ एकमे

त्रस्ततोदेवाऽस्तुरित्येषमंत्रकः एकमंत्रोंबिकावाक्यंचतुर्दशास्तथापरः १७ अर्धमंत्रोंतिमः प्रोक्तो
द्वादशीध्यायिकावयः अष्टाविंशतिमंत्रास्तुरेकाप्यर्धाकृतिस्तथा १८ पुनर्ऋषिस्ततोर्धंस्यात्त्रयस्त्रो
कास्त्रयोदशे एकादशार्धाकृतयोद्वादशश्लोकसंज्ञकाः १९ उवाचववचनैः षड्भिरेकोनत्रिंशदी
रिताः गौडपादीयभाष्याद्यैः कारिकास्तनसुदुर्लु २ पिबंतुविबुधाः सर्वेस्तनिनाशोयतोभवेत् २०
इतिकारिकावलिसमाप्ता ॥ रक्षोद्गाटनेनांबामाकोपमवलंबता देषवंतः स्रुताः संतिद
माश्रीलाक्ष्मिमातरः १ रंगनाथसुतेनेयं श्रीलक्ष्मीतनयेनच नीलकंठेनविदुषा मंत्रसंख्याप्रका
शिका २ कात्यायनीमंत्रवर्यैकृताटीकायथामति प्रीयतांतेनमेदेवीभुवनेशीमहेश्वरी ३
इतिश्रीरंगभट्टसुतलक्ष्मीगर्भजशैवोपनामकंठकृतायांकात्यायनीतंत्रेमंत्रव्याख्याप्रकाशि
कायांटीकायांत्रयोविंशः पटलः समाप्तः २३

15